पशुपत्यष्टकं

पशुपत्यष्टकं

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं |
पद्मासीनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ||

पशुपतिं द्युपतिं धरणीपतिं
भुजगलोकपतिं च सतीपतिं |
प्रणत भक्तजनार्तिहरं परं
भजत रे मनुजा गिरिजापतिं || 1 ||

न जनको जननी न च सोदरो
न तनयो न च भूरिबलं कुलं |
अवति कोऽपि न कालवशं गतं
भजत रे मनुजा गिरिजापतिं || 2 ||

मुरजडिंडिमवाद्यविलक्षणं
मधुरपंचमनादविशारदं |
प्रमथभूतगणैरपि सेवितं
भजत रे मनुजा गिरिजापतिं || 3 ||

शरणदं सुखदं शरणान्वितं
शिव शिवेति शिवेति नतं नृणां |
अभयदं करुणावरुणालयं
भजत रे मनुजा गिरिजापतिं || 4 ||

नरशिरोरचितं मणिकुंडलं
भुजगहारमुदं वृषभध्वजं |
चितिरजोधवळीकृतविग्रहं
भजत रे मनुजा गिरिजापतिं || 5 ||

मखविनाशकरं शशिशेखरं
सततमध्वरभाजि फलप्रदं |
प्रळयदग्धसुरासुरमानवं
भजत रे मनुजा गिरिजापतिं || 6 ||

मदमपास्य चिरं हृदि संस्थितं
मरणजन्मजराभयपीडितं |
जगदुदीक्ष्य समीपभयाकुलं
भजत रे मनुजा गिरिजापतिं || 7 ||

हरिविरंचिसुराधिपपूजितं
यमजनेशधनेशनमस्कृतं |
त्रिनयनं भूवनत्रितयाधिपं
भजत रे मनुजा गिरिजापतिं || 8 ||

पशुपतेरिदमष्टकमद्भुतं
विरचितं पृथिवीपतिसूरिणा |
पठति संशृणुते मनुजः सदा
शिवपुरीं वसते लभते मुदं || 9 ||

इति श्रीपृथिवीपतिसूरिविरचितं श्रीपशुपत्यष्टकं |